**CLASS : 12th** (Sr. Secondary) **Code No. 3656**

**Series : SS/Annual Exam.-2026**

*रोल न०* | | | | | | | | | | |

# उत्तर मध्यमा सह वरिष्ठ माध्यमिक परीक्षा संस्कृत साहित्य वेद सिद्धान्त (परम्परागत संस्कृत विद्यापीठ)

**Sub Code : 1204/SSA**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **6** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशाः – (क) **सर्वे प्रश्नाः समाधेयाः।***

*(ख) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ग) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(घ) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः – 'क'**

**(दीर्घउत्तरीयप्रश्नाः)**

**1.** (क) शिवराजविजयस्य ग्रन्थस्य द्वितीयनिःश्वासस्य सारं लिखत। $6 \times 1 = 6$

**अथवा**

शिवराजविजयस्य ग्रन्थस्य कथासारं लिखत।

(ख) शिववीरस्य चरित्रचित्रणं कुरुत। $6 \times 1 = 6$

**अथवा**

अम्बिकादत्तस्य जीवनंपरिचयं लिखत।

(ग) श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्य महत्त्वं प्रतिपादयत। $6 \times 1 = 6$

**अथवा**

श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्य सारं लिखत।

**2.** अधोलिखितगद्यांशस्य सप्रसङ्गं व्याख्या कार्या – $6 \times 1 = 6$

दौवारिकः – भगवन् ! भवान् संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददेवाऽयातीत्याक्रुश्यते।

संन्यासी – सत्यं क्षान्तोऽयमपराधः, परमद्यावधि संन्यासिनः, ब्रह्मचारिणः, पण्डिताः, स्त्रियः बालाश्च न किमपि प्रष्टव्याः, आत्मानमपरिचाययन्तोऽपि प्रवेष्टव्याः।

अथवा

शिववीरः – साधु, साधु कथं न स्यादेवम् ? भारतवर्षीया यूयम्, तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतवर्षम्, भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः, तमेते जाल्माः समूलमुच्छिन्दन्ति, अस्ति च 'प्राणा यान्तु, न च धर्मः'।

खण्डः 'ख'

(लघूत्तरीयप्रश्नाः)

**3.** अधोलिखितश्लोकेषु ***पञ्चानां*** सप्रसङ्गं व्याख्या कार्या – 4 × 5 = 20

(क) अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर।।

(ख) पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तः स्थानि भूतानि येन सर्वमिदं ततम्।।

(ग) अन्तकाले च मामेव स्मरन्मुक्तवा कलेवरम्।
य प्रयाति स मद्भावं याति नास्त्यत्र संशयः।।

(घ) यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्।
तं तमैवैति कौन्तेय सदा तद्भावभावितः।।

(ङ) अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्।।

(च) परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति।।

(छ) आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।।

(ज) धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।

तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते।।

**खण्डः – 'ग'**

**(अतिलघूत्तरीयप्रश्नाः)**

**4.** निम्नांकितगद्यांशं पठित्वा ***एकपदेन*** उत्तरं दीयताम् – 2 × 5 = 10

दौवारिकः – हंहो ! कपटसंन्यासिन् ! कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि ? ते केचनान्ये भवन्ति जारजाताः, ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति, न वयं शिवगणाः तादृशाः।

(क) दौवारिकः कं प्रताडयति ?

(ख) कीदृशा जनाः स्वात्मानं तमसे पातयन्ति ?

(ग) दौवारिकः कस्य गणस्य आसीत् ?

(घ) संन्यासी दौवारिकं किं शिक्षयति ?

(ङ) 'उत्कोच' इति पदस्य कोऽर्थः ?

**5.** निम्नांकितपद्यं पठित्वा ***एकपदेन*** उत्तरयत – 2 × 5 = 10

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।

यः प्रयाति त्यजन्देह स याति परमां गतिम्।।

(क) पद्येऽस्मिन् 'माम्' इति पदस्य वक्ता कः ?

(ख) एकाक्षरं ब्रह्म किमस्ति ?

(ग) कः परमां गतिं याति ?

(घ) श्लोकोऽयं कस्याध्यायस्य कस्य ग्रन्थस्य चास्ति ?

(ङ) 'ओम्' इति पदं स्मृत्वा कतमा गति याति ?

**खण्डः – 'घ'**

**(वस्तुनिष्ठप्रश्नाः)**

**6.** निम्नांकितेषु समीचीनमुत्तरं चिनुत – $1 \times 16 = 16$

(i) गौरसिंहस्य सखा क आसीत् ?

(क) श्यामसिंहः (ख) रघुवीरः

(ग) शिववीरः (घ) दौवारिकः

(ii) भिक्षुबटुः कियद् वर्षीयः ?

(क) नव (ख) सप्त

(ग) एकादश (घ) द्वादश

(iii) शिवराजविजयस्य लेखकः कः ?

(क) शिवदत्तः (ख) अम्बिकादत्तः

(ग) देवदत्तः (घ) यज्ञदत्तः

(iv) वीरप्रसविनीयं भूमिः कस्य देशस्य अस्ति ?

(क) कोङ्कणदेशस्य (ख) पूर्वदेशस्य

(ग) मध्यदेशस्य (घ) उत्तरदेशस्य

(v) 'प्रभाजालं' इति पदे कः समासः ?

(क) द्वितीयातत्पुरुषः (ख) तृतीयातत्पुरुषः

(ग) सप्तमीतत्पुरुषः (घ) षष्ठीतत्पुरुषः

(vi) शिवं वशीकृत्य अफजलखानः कमुपाधिं प्राप्तुं शक्नोति ?

(क) वीरवरः (ख) वीरोत्तमः

(ग) महान् सेनापतिः (घ) वीरपुङ्गवः

(vii) शिववीरस्य सारथी क आसीत् ?

(क) माल्यश्रीकः (ख) श्यामसिंहः

(ग) गौरसिंहः (घ) रघुवीरः

(viii) उल्लङ्घय इति पदस्य विच्छेदः कः ?

(क) उत् + लङ्घ + यत् (ख) उत् + लङ्घ + ल्यप्

(ग) उत् + लङ्घ + ण्यत् (घ) उत् + लङ्घ + क्यप्

(ix) गीताया अष्टमाध्यायस्य नाम किमस्ति ?

(क) विभूतियोगः (ख) ब्रह्मयोगः

(ग) पुरुषोत्तमयोगः (घ) अक्षरब्रह्मयोगः

(x) यतयो वीतरागाः किं पदं विशन्ति ?

(क) समम्  (ख) विषमम्

(ग) परमम्  (घ) उत्तमम्

(xi) अधिभूतं को भावः ?

(क) निरक्षरः  (ख) क्षयः

(ग) साक्षरः  (घ) क्षरः

(xii) शुक्लपक्षे किम् अयनम् भवति ?

(क) दक्षिणायनम्  (ख) परायणम्

(ग) उत्तरायणम्  (घ) परिक्रमणम्

(xiii) किम् अक्षरं ब्रह्मोच्यते ?

(क) परमेश्वरः  (ख) शिवः

(ग) ओम्  (घ) गणेशः

(xiv) अर्जुनस्य मातुः नाम किम् ?

(क) कैकेयी  (ख) कुन्ती

(ग) गान्धारी  (घ) कौशल्या

(xv) कृष्णपक्षे कति मासाः भवन्ति ?

(क) चत्वारः (ख) पञ्च

(ग) षट् (घ) अष्टौ

(xvi) 'अहोरात्रविदो जनाः' इति केन उक्तम् ?

(क) अर्जुनेन (ख) रामेण

(ग) श्रीकृष्णेन (घ) दुर्योधनेन